Impact Factor : 7.720
ISSN 2349-364X

# वेदाञ्जलि Vedanjali

अन्तर्राष्ट्रीय विद्वत्समीक्षित षाणमासिकी शोधपत्रिका

*(International Peer Reviewed Refereed Journal of Multidisciplinary Research)*

वर्ष-१२ अंक-२४, भाग-६ जुलाई-दिसम्बर २०२५

प्रधान सम्पादक
डॉ० रामकेश्वर तिवारी

सह सम्पादक
श्री प्रसून मिश्र

प्रकाशन : वैदिक एजूकेशनल रिसर्च सोसाइटी, वाराणसी

# पारस्करगृह्यसूत्रे पञ्चमहायज्ञः – एकमध्ययनम्

**Dr. Saroj Mahananda**
Lecturer in sanskrit, Bhima Bhoi College Rairakhol, Sambalpur

**शोधसारः** - गृहस्थाश्रमे अवस्थिताभ्यां गृहस्थ-गृहिणीभ्यां देवयज्ञः भूतयज्ञः पितृयज्ञः मनुष्ययज्ञः ब्रह्मयज्ञश्चेति पञ्चमहायज्ञाः अनुष्ठेयाः । देवयज्ञेन गृहपतिः गृहपत्नी च विधिपूर्वकं देवानां कृते भोज्यपदार्थं समर्पयतः, भूतयज्ञेन गृहपतिः गृहपत्नी च विधिपूर्वकं भूतगृह्येभ्यः भोज्यपदार्थ प्रदत्तः, पितृयज्ञेन गृहपतिः गृहपत्नी च विधिपूर्वकं पितृपुरुषेभ्यः भोज्यपदार्थ प्रदत्तः, ब्रह्मयज्ञेन गृहपतिः प्रतिदिनं स्वाध्यायम् अध्यापनञ्च करोति, मनुष्ययज्ञेन गृहपतिः गृहपत्नी च विधिपूर्वकं गृहागतेभ्यः परिव्राजक-ब्रह्मचारीप्रभृतिभ्यः भिक्षाभोजनदानादिभिः सम्यग्रूपेण आतिथ्यसत्कारं कुरुतः। एतेषु पञ्चमहायज्ञेषु पर्याप्तपरिमाणैः सामाजिकमूल्यबोधाः परिलक्ष्यन्ते। यज्ञस्तु त्यागवाचकशब्दः। एतेषु पञ्चमहायज्ञेषु सर्वेषां पोषणाय रक्षणाय च गृहस्थानां कृते विविधप्रकाराणां त्यागादीनां विधानमस्ति । वास्तवतः चतुराश्रमाणां परिपालनं हि गृहस्थस्य गुरुदायित्वं भवति। परन्तु अधुना समाजे वासं कृतवन्तः गृहस्थाः स्वकर्त्तव्यं निष्ठया सह न पालयन्ति । अतः अनेन शोधप्रबन्धमाध्यमेन समाजस्य हिताय गृहस्थानां कर्त्तव्यं प्रति सचेतनतां कर्त्तुमपि शक्यते ।

**कूटशब्दाः** - पाकयज्ञः, हुतः, अहुतः, प्रहुतः, प्राशितः, देवयज्ञः, भूतयज्ञः, पितृयज्ञः, मनुष्ययज्ञः, ब्रह्मयज्ञश्च ।

**उपक्रमः** - शुक्लयजुर्वेदस्य गृह्यसूत्रं भवति पारस्करगृह्यसूत्रम् । इदं गृह्यसूत्रं शुक्लयजुर्वेदस्य द्वयोः शाखयोः प्रतिनिधित्वं करोति। हिलब्राण्डानुसारं पारस्करगृह्यसूत्रस्य अपरनाम भवति वाजसनेयगृहसूत्रम्। आचार्यः पारस्करः अस्य गृह्यसूत्रस्य रचयिता भवति। पारस्करगृह्यसूत्रेऽस्मिन् त्रीणि काण्डानि सन्ति । प्रथमकाण्डे उनविंशतिः कण्डिकानि, द्वितीयकाण्डे सप्तदश कण्डिकानि, तृतीयकाण्डे च पञ्चदश कण्डिकानि सन्ति। एतेषु द्वितीयकाण्डस्य महती भूमिका वर्तते । अस्मिन् काण्डे पञ्चमहायज्ञानां महत्त्वं वर्णनमस्ति ।

यज्ञशब्दः यजयाचयतविच्छप्रच्छरक्षो नङ् (अ.३.३.९०) इति सूत्रेण यज्-धातोः (देवपूजासङ्गतिकरणदानेषु)[1] नङ्-प्रत्यययोगेन निष्पत्तिर्भवति। पच्यते श्रप्यते ओदनादिकमस्मिन्निति पाकः। गृहाग्निना ओदनादिपाककर्मार्थे सम्पाद्यमानः यज्ञः पाकयज्ञः इति कथ्यते । पाकयज्ञः चतुर्विधः- १. हुतः, २. अहुतः, ३. प्रहुतः, ४. प्राशितः। हुतयज्ञे केवलं होममात्रं क्रियते। यथा- प्रातःकालीनहोमः, सायंकालीनहोमः। होमबलिरहितकर्म अहुतयज्ञे क्रियते । यथा- स्रस्तरारोहणम् । प्रहुतयज्ञे होमकर्म बलिकर्म चोभयं विधीयते । यथा- पक्ष्यादिकर्म । प्राशितयज्ञे होमः न क्रियते बलिश्च न प्रदीयते, केवलं भोजनदानं क्रियते । यथा- सर्वासां गवां पायसश्रवणानन्तरं ब्राह्मणभोजनम्।

**१. पारस्करगृह्यसूत्रे पञ्चमहायज्ञः** - समावर्त्तनान्तरं कृतविवाहस्य पञ्चमहायज्ञेषु अधिकारः वर्त्तते। देवयज्ञः, भूतयज्ञः, पितृयज्ञः, मनुष्ययज्ञः, ब्रह्मयज्ञश्चेति पञ्च महायज्ञाः नित्यविधित्वात् गृहस्थैः अहरहः कर्त्तव्याः। पारस्करगृह्यसूत्रस्य द्वितीयकाण्डस्य नवमकण्डिकायां पञ्चमहायज्ञानां विषये वर्णितमस्ति।

**१.१. ब्रह्मयज्ञः** - पारस्करगृह्यसूत्रे यद्यपि ब्रह्मयज्ञविषये किमपि न कथ्यते, तथापि अथातः पञ्च महायज्ञाः[2] इति सूत्रस्य निर्देशात् ब्रह्मयज्ञस्य अनुष्ठानं गृहस्थैः करणीयमिति ज्ञायते। हरिहरभाष्ये अथातः पञ्चमहायज्ञाः इति सूत्रस्य हरिहरभाष्ये पञ्चमो ब्रह्मयज्ञः, गदाधरभाष्ये पञ्चग्रहणात्पञ्चमो ब्रह्मयज्ञश्चेति उल्लिख्येते।[3] ब्रह्मयज्ञविषये पारस्करगृह्यसूत्रस्य गदाधरभाष्ये एवमुच्यते यत्- तत्रासनोपरि न्यस्तप्रागग्रदर्भेषु प्राङ्मुख उपविष्टः पवित्रपाणिरन्यान्दर्भा-न्पाणिभ्यामादाय प्रणवव्याहृतिपूर्वां गायत्रीमाम्नाय स्वरेणाधीत्य इषेत्वा इत्यादिवेदमारभ्य यथाशक्ति कण्डिकाऽध्यायशो वा संहितां समाप्य ब्राह्मणमादावारभ्य समापयेत्। तच्च समाप्य द्विवेदाध्यायी चेद् द्वितीयवेदम्। एवं क्रमेणादावारभ्य समापयेत्। एवमेव तृतीयवेदं चतुर्थवेदं च। एवमेवेतिहासपुराणादीन्यपि पठित्वा आदावारभ्य क्रमेण समापनीयानि। जपयज्ञप्रसिद्धये प्रत्यहं चाध्यात्मिकीं विद्यामुपनिषदमपि क्रमेण ब्रह्मयज्ञान्ते पृथक् पठेत्।

**बद्धाञ्जलिर्दर्भपाणिः प्राङ्मुखस्तु कुशासनः । वामाङ्घ्रिमुत्तमं कृत्वा दक्षिणं तु तथा करम् ।।**
**दक्षिणे जानुनि करोत्यञ्जलिं तमृषेर्मतात् । प्रणवं प्राक् प्रयुञ्जीत व्याहृतीस्तिस्र एव तु ।।**
**गायत्रीं चानुपूर्व्येण विज्ञेयं ब्रह्मणो मुखम् । ओँ स्वस्ति ब्रह्मयज्ञान्ते प्रोक्त्वा दर्भान् क्षिपेदुदक् ।।**
**वेदादिकमुपक्रम्य यावद्वेदसमापनम् । आध्यात्मिकाऽथवा विद्या ऋग्यजुः साम एव च ।। इति ब्रह्मयज्ञः ।**[4]

**१.२. देवयज्ञः** - देवेभ्यः यज्ञः देवानां यज्ञः इति देवयज्ञः । देवशब्दस्य व्युत्पत्तिं दर्शयित्वा यास्काचार्यः कथयति- देवो दानाद्वा दीपनाद्वा द्योतनाद्वा द्युस्थाने भवति इति वा।[5] पारस्करगृह्यसूत्रे देवयज्ञे ब्रह्मणे प्रजापतये गृह्याभ्यः कश्यपाय अनुमतये चेति पञ्च देवेभ्यः वैश्वदेवमन्नरूप-हविःप्रदानार्थमुपदिश्यते । तथा हि-

**वैश्वदेवादन्नात्पर्युक्ष्य स्वाहाकारैर्जुहुयाद् ब्रह्मणे प्रजापतये गृह्याभ्यः कश्यपायानुमतय इति ।**[6]

हविःप्रदानसमये एवंरूपेण मन्त्रः पठनीयः –

**ब्रह्मणे स्वाहा, प्रजापतये स्वाहा, गृह्याभ्यः स्वाहा, कश्यपाय स्वाहा, अनुमतये स्वाहा इति।**

परन्तु आहुतिप्रदानात् पूर्वं भूमिशोधन-पात्रशोधनादिकर्माणि समापनीयानि।[7]

**१.३. भूतयज्ञः -** भूतशब्दस्य अर्थः भवति प्राणी। प्राणिनां कृते उद्दिष्टः यज्ञः भूतयज्ञः भवति। भूतयज्ञे प्राणिभ्यः नमस्कारपूर्वकं बलिरूपेण भोज्यद्रव्यं प्रदीयते। भूतयज्ञे मणिकसमीपे पर्जन्याय अद्भ्यः पृथिव्यै च पर्जन्याय नमः, अद्भ्यः नमः, पृथिव्यै नमः चेति मन्त्रोच्चारणपूर्वकं त्रीन् बलीन् दद्यात्। ततः दक्षिणोत्तरयोः द्वयोः द्वारदेशयोः धात्रे नमः, विधात्रे नमः चेति मन्त्रोच्चारणपूर्वकं धात्रे विधात्रे च द्वौ बली दद्यात्। तदनन्तरं सर्वाभ्यः चतसृभ्यः दिग्भ्यः प्राच्चै दिशे नमः, दक्षिणायै दिशे नमः, प्रतीच्यै दिशे नमः, उदीच्यै दिशे नमः चेति मन्त्रोच्चारणपूर्वकं बलिचतुष्टयं दद्यात्। ततः मध्ये ब्रह्मणे नमः, अन्तरिक्षाय नमः, सूर्याय नमः चेति मन्त्रोच्चारणपूर्वकं त्रीन् बलीन् दद्यात्। ततः ब्रह्मादिबलीनामुत्तरप्रदेशे विश्वेभ्यो देवेभ्यो नमः, विश्वेभ्यो भूतेभ्यो नमश्चेति बलिद्वयं दद्यात्। ततःपरं तयोरपि बल्योरुत्तरतः उषसे नमः, भूतानां पतये नमश्चेति बलिद्वयं दद्यात्। तथा हि-

**भूतगृह्येभ्यो मणिके त्रीन् पर्जन्यायाद्भ्यः पृथिव्यै। धात्रे विधात्रे च द्वार्ययोः। प्रतिदिशं वायवे दिशां च। मध्ये त्रीन् ब्रह्मणेऽन्तरिक्षाय सूर्याय। विश्वेभ्यो देवेभ्यो विश्वेभ्यश्च भूतेभ्यस्तेषामुत्तरतः। उषसे भूतानां च पतये परम्।**[8]

**१.४. पितृयज्ञः -** पा (रक्षणे) धातोः तृच्-प्रत्यययोगेन पितृशब्दस्य[9] निष्पत्तिः भवति। पान्ति पालयन्ति रक्षन्ति अन्नविद्यासु शिक्षादिभिः ये ते पितरः। प्रेतलोके निवसतां पितृपुरुषाणां कृते उद्दिष्टः यज्ञः पितृयज्ञः भवति। पारस्करगृह्यसूत्रानुसारं ब्रह्मादिबलीनां दक्षिणप्रदेशे पितृकर्मत्वात् प्राचीनावीती दक्षिणामुखः सन् पितृभ्यः स्वधा नमः इति उच्चार्य बलिं पात्रावशिष्टेन अन्नेन दद्यात्। उद्धरणपात्रं प्रक्षाल्य निर्णेजनजलं तेषामेव ब्रह्मादिबलीनां उत्तरापरस्यां वायव्यदिशि उत्सृजेत्। तथा हि-

**पितृभ्यः स्वधा नम इति दक्षिणतः। पात्रं निर्णिज्योत्तरापरस्या दिशि निनयेद्यक्ष्मैतत्त इति।**[10]

सूत्रमिदमुपदिशति यत् पितृपुरुषाः सदैव पूजनीयाः भवन्ति। तेषां कृते सम्यग् आचारः प्रदर्शनीयः। अतः तेभ्यः सम्मानेन सह बलिप्रदानं करणीयम्। तदर्थम् आचार्यपारस्करेण पितृभ्यः स्वधा नोक्त्वा पितृभ्यः स्वधा नम इति उल्लिखति।

**१.५. नृयज्ञः -** नृयज्ञे वैश्वदेवादन्नात् अवदाय षोडशग्रासपरिमितं ग्रासचतुष्टयपर्याप्तं वा अन्नं ब्राह्मणाय अवनेजनं दत्त्वा हन्त ते इति मन्त्रेण दद्यात्। ततः यथार्हं भिक्षुकान् परिव्राजक- ब्रह्मचारिप्रभृतीन् अतिथीन् अध्वनीनान् श्रोत्रीयादीन् भिक्षाभोजनादिदानेन गृहमेधिनः तोषयेरन्। तथा हि- **उद्धृत्याग्रं ब्राह्मणायावनेज्य दद्याद्धन्त त इति। यथार्हं भिक्षुकानतिथींश्च सम्भजेरन्।**[11]

पञ्चमहायज्ञसमापनादनन्तरं गृहे स्थिताः बालज्येष्ठाः पुत्र-कन्या-पिता-माता-भ्राता-भग्नीप्रभतयः यथायोग्यम् भुञ्जीरन्। ततः अतिथिभोजनादनन्तरं गृहपतिःगृहपत्नी च अश्नीयाताम्। अथवा अतिथिभ्यः भोजनप्रदानात् पूर्वं गृहपतिः भोजनस्य स्वादपरीक्षणार्थं प्रथमम् अश्नीयात्। तथा हि- **बालज्येष्ठाःगृह्या यथार्हमश्नीयुः। पश्चात्गृहपतिःपत्नी च। पूर्वो वागृहपतिः, तस्माद् स्वादिष्टं गृहपतिः पूर्वोऽतिथिभ्योऽश्नीयादिति श्रुतेः।**[12]

प्रतिदिनं देवेभ्यः अन्नं जुहुयात्। अन्नाभावे केनचित् द्रव्येण काष्ठपर्यन्तेन अपि होमं कुर्यात्। पितृभ्यः अन्नेन स्वधा कुर्यात्, अन्नाभावे उदकपात्रपर्यन्तेन स्वधा कुर्यात्, मनुष्येभ्यः अन्नेन सत्कारं कुर्यात्, अन्नाभावे अपि उदकपात्रपर्यन्तेन सत्कारं कुर्यात्। तथा हि- **अहरहः स्वाहा कुर्यादन्नाभावे केनचिदाकाष्ठाद्देवेभ्यः पितृभ्यो मनुष्येभ्यश्चोदपात्रात्।**[13]

**उपसंहारः -** सर्वेषां प्राणिनां सन्तोषविधानमेतेषां पञ्चमहायज्ञानामनुष्ठानस्य मुख्यप्रयोजनं भवति। पञ्चमहायज्ञानामनुष्ठानमूले सर्वेषां प्राणिनां कल्याणं निहितमस्ति। गृहस्थाश्रमे अवस्थिताभ्यां गृहस्थ-गृहिणीभ्यां देवयज्ञः भूतयज्ञः पितृयज्ञः मनुष्ययज्ञः ब्रह्मयज्ञश्चेति पञ्चमहायज्ञाः अनुष्ठेयाः। देवयज्ञेन गृहपतिः गृहपत्नी च विधिपूर्वकं देवानां कृते भोज्यपदार्थं समर्पयतः, भूतयज्ञेन गृहपतिः गृहपत्नी च विधिपूर्वकं भूतगृह्येभ्यः भोज्यपदार्थं प्रदत्तः, पितृयज्ञेन गृहपतिः गृहपत्नी च विधिपूर्वकं पितृपुरुषेभ्यः भोज्यपदार्थं प्रदत्तः, ब्रह्मयज्ञेन गृहपतिः प्रतिदिनं स्वाध्यायम् अध्यापनञ्च करोति, मनुष्ययज्ञेन गृहपतिः गृहपत्नी च विधिपूर्वकं गृहागतेभ्यः परिव्राजक-ब्रह्मचारीप्रभृतिभ्यः भिक्षाभोजनदानादिभिः सम्यग्रूपेण आतिथ्यसत्कारं कुरुतः। एतेषु पञ्चमहायज्ञेषु पर्याप्तपरिमाणैः सामाजिकमूल्यबोधाः परिलक्ष्यन्ते। यज्ञस्तु त्यागवाचकशब्दः। एतेषु पञ्चमहायज्ञेषु सर्वेषां पोषणाय रक्षणाय च गृहस्थानां कृते विविधप्रकाराणां त्यागादीनां विधानमस्ति। वास्तवतः चतुराश्रमाणां परिपालनं हि गृहस्थस्य गुरुदायित्वं भवति। परन्तु अधुना समाजे वासं कृतवन्तः गृहस्थाः स्वकर्त्तव्यं निष्ठया सह न पालयन्ति। अतः अनेन शोधप्रबन्धमाध्यमेन समाजस्य हिताय गृहस्थानां कर्त्तव्यं प्रति सचेतनतां कर्त्तुमपि शक्यते।

**संदर्भ -**

1. धातुपाठः, पृ.-२२
2. पा.गृ.सू.-२.९.१

3. पाठकः, जमुना , पारस्करगृह्यसूत्रम्, पृ.३६९-३७०
4. पाठकः, जमुना , पारस्करगृह्यसूत्रम्, पृ.३७८-३७९
5. निरुक्तम्- ७.१५
6. पा.गृ.सू.-२.९.२
7. पा.गृ.सू.-१.१.१-५
8. पा.गृ.सू.-२.९.३-८
9. अष्टाध्यायी- ३.१.१३३
10. पा.गृ.सू.-२.९.९-१०
11. पा.गृ.सू.-२.९.११-१२
12. पा.गृ.सू.-२.९.१३-१५
13. पा.गृ.सू.-२.९.१६

**सहायकग्रन्थसूची**

1. काणे,पी० वी०,धर्मशास्त्र का इतिहास (प्रथमभाग),हिन्दीसंस्थानम्, उत्तरप्रदेशः, १९९२
2. त्रिपाठी, ब्रह्मानन्दः, पारस्करगृह्यसूत्रम्, चौखम्बासुरभारतीप्रकाशनम्, वाराणसी, २०१०
3. पाण्डेयः, ओम् प्रकाशः, पारस्करगृह्यसूत्रम्, चौखम्बा अमरभारती प्रकाशनम्, वाराणसी, प्रथमसंस्करणम्- १९८०
4. पाण्डेयः, राजबली , हिन्दूसंस्कारः, चौखम्बाविद्याभवनम्, वाराणसी, २०११
5. मालवीयः, सुधाकर (सं.), ,पारस्करगृह्यसूत्रम्, चौखम्भाप्रकाशनम्, वाराणसी, २०१४
6. मिश्रः, जगदीशचन्द्रः, वैदिकवाङ्मयस्येतिहासः, चौखम्बा सुरभारती प्रकाशनम्, वाराणसी , २००९
7. मिश्रशर्मा, कुलमणिः, पारस्करगृह्यसूत्रम्, राष्ट्रियसंस्कृतसंस्थानम् (मानितविश्व- विद्यालयः) श्रीसदाशिवपरिसरः, पुरी, प्रथमसंस्करणम्-१९८१

❖